(यथा, शाकुन्तले १ अङ्के ।
"ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
उत्कर्षः । रथचक्रम् । इति हेमचन्द्रः ।३।४१६॥ (यथा, रघुः । १३ । १५ ।
"आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥")
वृष्टिः । अतिवृष्टिः । (यथा, पञ्चतन्त्रे । २।६२ ।
"पर्ज्जन्यस्य यथा धारा यथा च दिवि तारकाः ।
सिकतारेणवो यद्वत् संख्यया परिवर्ज्जिताः ।
गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः ॥")
समूहः । इति शब्दरत्नावली ॥ घनासारवर्षणम् । यशः । इति विश्वः ॥ (प्रवाहः । यथा, याज्ञवल्क्ये । १ । २८० ।
"सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥")
दक्षिणदेशस्थपुरीविशेषः । इति विक्रमचरितम् ॥ * ॥ (तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । २३ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
धारां नाम महाप्राज्ञ ! सर्व्वपापप्रमोचनीम् ।
तत्र स्नात्वा नरव्याघ्र ! न शोचति नराधिप !॥")
अथ ज्वरादिशान्त्यर्थं श्रीनरसिंहादिमूर्द्ध्नि जलधारापातनविधिः । यथा, नृसिंहपुराणे ।
"तथा महाज्वरग्रस्ते धारां देवस्य मूर्द्धनि ।
सन्ततां नारसिंहस्य कुर्य्याद्वा कारयेत् द्विजैः ॥
होमञ्च भोजनञ्चैव तस्य दोषः प्रशाम्यति ॥"

धाराकदम्बः, पुं, (धारा कालोपलक्षितः कदम्बः । वर्षाकाले जायमानत्वादस्य तथात्वम् ।) कदम्बवृक्षप्रभेदः । केलिकदम् इति भाषा ॥ तत्पर्य्यायः । प्रावृष्यः २ पुलकी ३ भृङ्गवल्लभः ४ मेघाख्यः ५ प्रियकः ६ नीपः ७ प्रावृषेण्यः ८ कलम्बकः ९ । इति राजनिर्घण्टः ॥ धाराकदम्बकः १० । इति त्रिकाण्डशेषः ॥

धाराङ्कुरः, पुं, (धारायाः वृष्टेः अङ्कुर इव ।) शीकरः । वर्षोपलः । नासीरः । इति मेदिनी । रे, २९६ ॥

धाराङ्गः, पुं, (धारा उत्कर्ष इव अङ्गं यस्य । श्रेष्ठत्वादस्य तथात्वम् ।) तीर्थम् । (धारान्वितमङ्गमस्य ।) खड्गः । इति हेमचन्द्रः ॥

धाराटः, पुं, (धारायै वृष्ट्यर्थं अटतीति । अट + अच् ।) चातकः । (धारामटति वेगगमनेन प्राप्नोतीति ।) मेघः । (धारां गतिं अटतीति ।) तुरङ्गः । मत्तहस्ती । इति शब्दरत्नावली ॥

धाराधरः, पुं, (धरतीति । धृ + अच् । धाराया धरः ।) मेघः । (यथा, उत्तररामचरिते । ४ ।
"रे धाराधर ! धीरनीरनिकरैरेवा त्वया नीरसा
शैला पूरकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं स्वान्तेन सञ्चिन्तयन्
आचार्य्यं परिपीडितोऽभिरमते यच्चातक-
तृष्णया ॥"
खड्गः । इति मेदिनी । रे, २९६ ॥

धाराफलः, पुं, (धारा फले यस्य ।) मदनवृक्षः । इति राजनिर्घण्टः ॥ (मदनशब्देऽस्य गुणपर्य्याया ज्ञातव्याः ॥)

धारावनिः, पुं, (धारायाः वृष्टेः अवनिः पृथ्वीव । अभिधानात् पुंस्त्वम् ।) वायुः । इति त्रिकाण्डशेषः ॥

धाराविषः, पुं, (धारा एव विषमिव यस्य प्राणनाशकत्वात् ।) खड्गः । इति त्रिकाण्डशेषः ॥

धारासम्पातः, पुं, (धारायाः सम् सम्यक् पातो यत्र ।) महावृष्टिः । तत्पर्य्यायः । धारा १ सम्पातः २ आसारः ३ । यथा,—
"धारा सम्पात आसारस्तितयञ्चापि कुत्रचित् ॥"
इति शब्दरत्नावली ॥
(यथा, प्रबोधचन्द्रोदये ५ अङ्के ।
"ततो देवि ! परस्परं करितुरगरथपदातीनां निरन्तर-शरनिकर-धारासम्पातोपदर्शितदुर्द्दिनानां तेषामस्माकं च योधानां तुमुलः सम्प्रहारः प्रावर्त्तत ॥")

धारास्नुही, स्त्री, (धारान्विता स्नुही ।) त्रिधारस्नुही । इति राजनिर्घण्टः ॥ तेकाँटासिज इति भाषा ॥

धारिणी, स्त्री (धरतीति । धृ + णिनिः + ङीप् ।) धरणी । इति शब्दरत्नावली ॥ शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥ चतुर्द्दशदेवयोषित्सु । यथा,—
"शची वनस्पती गार्गी धूम्रोर्णा रुचिराकृतिः ।
सिनीवाली कुहू राका तथा चानुमतिः शुभा ॥
आयतिर्नियतिः प्रज्ञा सेला वेला च नामतः ।
एताश्चतुर्द्दश प्रोक्ता धारिण्यो देवयोषितः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(धारणकर्त्री । यथा, विष्णुपुराणे । १।१३।८८।
"प्राणप्रदानात् स पृथुर्यस्मात् भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥"
आधारस्वरूपा । यथा, तत्रैव । १ । १३ । ९१ ।
"सैषा धात्री विधात्री च धारिणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥"
"धात्री माता विधात्री कर्त्री धारिणी आधारः पोषणी पोषणकर्त्री ।" इति तट्टीकायां श्रीधरस्वामी ॥)

धारी, [न्] पुं, (धरतीति । धृ + णिनिः ।) पीलुवृक्षः । इति जटाधरः ॥ त्रि, धारणविशिष्टः ॥ (धारकः । यथा, महाभारते ।५ । ३९ । ११ ।
"तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणम् ॥"
ग्रन्थतात्पर्य्यज्ञः । यथा, मनुः । १२ । १०३ ।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥")

धारुः, त्रि, (धयति पिबतीति । धे ट पाने + "दाधेट्सिशदसदो रुः ।" ३ । २ । १५९ । इति रुः ।) पानकर्त्ता । इति जटाधरः ॥ (यथा, अथर्व्ववेदे । ४ । १८ । २ ।
"वत्सो धारुरिव मातरं तं प्रत्यगुपपद्यताम् ॥")

धारोष्णं, क्ली, (धारायां दोहनप्रपाते उष्णम् ।) दोहनेनोष्णधारया पतितदुग्धम् । तस्य गुणाः ।
"धारोष्णममृतं पयो श्रमहरं निद्राकरं कान्तिदं
वृष्यं बृंहणमग्निवर्द्धनमतिस्वादु त्रिदोषापहम् ॥"
इति राजनिर्घण्टः ॥
("धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ॥
धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

धार्त्तराष्ट्रः, पुं, कृष्णवर्णचञ्चुचरणयुक्तहंसः । गेड़ि हाँस इति भाषा ॥ इत्यमरः । २ । ५ ।२४ ॥ (यथा, वेणीसंहारे १ अङ्के सूत्रधारस्य शरद्वर्णनायाम् ।
"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धता-
रम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥")
सर्पविशेषः । धृतराष्ट्रपुत्रः । इति मेदिनी । रे, २७० ॥ (यथा, वेणीसंहारे १ अङ्के ।
"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ॥")

धार्त्तराष्ट्रपदी, स्त्री, (धार्त्तराष्ट्रस्य पाद इव पादो मूलं यस्याः । ङीष् पद्भावः ।) हंसपदी । इति राजनिर्घण्टः ॥ (विवृतिरस्या हंसपदीशब्दे ज्ञातव्या ॥)

धार्म्मिकः, त्रि, (धर्म्मं चरतीति । धर्म्म + "धर्म्मं चरति ।" ४ । ४ । ४१ । इति ठक् । यद्वा, धर्म्ममधीते वेद वा । "क्रतूक्थादिसूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् ।) धर्म्मशीलः । तत्पर्य्यायः । धैवसु २ । इति जटाधरः ॥ (यथा, महाभारते । १ । १२२ । ४१ ।
"धार्म्मिकश्च कुरूणां स भविष्यति न संशयः ॥")

धार्य्यं, त्रि, (ध्रियते इति । धृ + ण्यत् ।) धारणीयम् । यथा,—
"धातातुराश्वयसुपुष्यविशाखहस्ता-
चित्रोत्तराश्विपवनार्दितिरेवतीषु ।
जन्मर्क्षजीवबुधशुक्रदिनोत्तमवारे
धार्य्यं नवं वसनमीश्वरविप्रतुष्ट्यै ॥"
इति समयप्रदीपः ॥
(ध्रियते परिधीयते इति । वस्त्रे, क्ली । यथा, भागवते । ६ । १८ । १४ ।
"वयं तथापि भगवन् ! शिशोरस्या नः पितामहः ।
अस्मत्कार्य्ये धृतवती भूत्वा वेदमिवासती ॥")

धाव, उ ञ जवे । शुद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-अकं-शुद्धीकरणे सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, धावित्वा धौत्वा । ञ, धावति धावते । जवः शीघ्रगतिः । मायुधापाणिः पुनस्तत्र यमदूतोऽपि धावतीति हलायुधः । स्यट् शुद्धिभावः शुद्धीकरणञ्च । धावति ताम्रमम्लेन शुध्यतीत्यर्थः ।
'दधावद्भिस्तलक्षाः सुग्रीवस्य विभीषणः ।'
अस्य जवे निष्ठायां अप्रयोगः । धौतं वासः । इति दुर्गादासः ॥